Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SHISRRJ | Volume 1 | Issue 4 | ISSN : 2581- 6306

# जातकर्मसंस्कार:

**R.V. Satyanarayanacharyulu**
Asst. Professor, Faculty of Vaikhanasa & Paraskara Pourohitya, S.V. Vedic University, Tirupati, A.P.

**शोधप्रबन्धसारांश:** – जातस्य पुत्रस्य सर्वारिष्टरिष्टविनाशाय,रोगनाशनाय,दीर्घाष्याभिवृद्धये,सर्वसम्पत्- समृद्धये, जन्मकाले अशुभयोगानां विनाशाय च जातकर्म कर्तव्यमिति उक्तं शिङ्गाभट्टीये।

**अथात: सम्प्रवक्ष्यामि जातकर्म क्रियां शुभाम्।**
**जातस्यारिष्टनाशाय निरोगत्वाय सर्वदा।।**
**दीर्घायुष्याय चान्यैव सर्वसम्पत्समृद्धये।**
**जन्मन्यशुभयोगानां विनाशाय विशेषत:।। इति**

**जातकर्मशब्दार्थ:- जातं प्रति यत्क्रियते अस्मिन् तत् जातकर्म**

**जातकर्म आवश्यकता – शिङ्गाभट्टीये – (बार्हस्पत्यसंहितायां 24 पुट) –**

**श्लो।। अथात: सम्प्रवक्ष्यामि जातकर्मक्रियां शुभाम्।**
**जातस्यारिष्टनाशाय निरोगत्वाय सर्वदा।।**
**दीर्घायुष्याय चान्यैव सर्वसम्पत्समृद्धये।**
**जन्मन्यशुभयोगानां विनाशाय विशेषत:।।**

**कुञ्चिकाशब्दा:** – अरिष्टागारं, वृषभोषितं, सर्षप:, तज्ञा: स्त्रिय:, विशल्यां, सवर्चलां, पिण्डितकी, अहिकृत्य इत्यादि।

**सारांश:** –जातस्य अरिष्टनिवारणार्थं, आरोग्यप्रदानार्थं, आयुर्वृद्ध्यर्थं, सर्वसम्पत्समृद्ध्यर्थं, जननकाले जनित ज्ञानाऽज्ञानकृतसर्वदोषनिवारणार्थं विशेषशुभफलावाप्त्यर्थं इदं जातकर्म सर्वदा अवश्यं अनुष्ठेया इति भगवान् विखना: उपदेशितम्।

**ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।**
**आधारं सर्वविद्यानां हयग्रीवमुपास्महे ।।**
**जन्मना ब्राह्मणो ज्ञेय: संस्कारै: द्विज उच्यते।**
**विद्यया याति विप्रत्वं त्रिभि: श्रोत्रिय एव च [1]।।**

श्रोत्रियस्य वैखानसस्य चत्वारिंशत्संस्कारा: स्मृतिषु निरूपिता:। तेषु अष्टादश शारीरसंस्कारा:। अष्टादशसंस्कारेष्वपि ऋतुसङ्गम-गर्भाधान-पुंसवन-सीमन्तोन्नयन- विष्णुबलि-जातकर्माणि जातमात्रस्यैव शिशो: भवन्ति। आसन्नप्रसवाया: स्त्रिय: जनिष्यमाणपुत्रस्य पावनत्वसिद्धये एते संस्कारा: स्मृतिषु विहिता:। एतेषु षट्स्वपि पूर्वे पञ्चसंस्कारा: गर्भसंस्काररूपा:। षष्ठ: संस्कार: जातस्य शिशो: विहित:। मातृगर्भात् निष्क्रममाणस्य शिशोरयं संस्कार:।

---

[1].श्रीवै-गृ-सू – प्रथमप्रश्ने – प्रथमखण्डे – 11 सूत्रव्याख्यायाम् – पुट-7

Received : 15 Nov 2018 | Accepted : 30 Nov 2018 | November-December-2018 [ 1 (4) : 269-272 ]

**जातकर्मशब्दार्थः** – जातमिति **जनी-प्रादुर्भावे इति धातोः अदिकर्मणि क्तः कर्तरि च**[2] इति क्तप्रत्यये धातोः **ज्ञाजनोर्जा**[3] इति जादेशः। आदिकर्म नाम प्रारब्धापरिसमाप्तः। ततः प्रसवकालादारभ्य शिशोः निर्गमनपर्यन्तं क्रियमाणं कर्म जातकर्म। अत एव जातं प्रति कर्म इति मध्यमपदलोपी समासः इति सुन्दरराजेन गृह्यसूत्रभाष्ये निरूपितः। इदानीं जातकर्मणः प्राधान्यं, तदनुष्ठानप्रकारश्च उच्यते।

**जातकर्मप्राधान्यम्** – जातस्य पुत्रस्य अशुभनाशाय, रोगराहित्यसिद्धये, दीर्घायुष्यसिद्धये, सर्वसम्पत्समृद्धये, जननकाले ये ये अशुभयोगाः तेषां नाशाय च जातकर्मणः अपरिहार्यत्वं स्मृतिषु निरूपितम्।

**अथाऽतः सम्प्रवक्ष्यामि जातकर्मक्रियां शुभाम् ।**
**जातस्यारिष्टनाशाय निरोगत्वाय सर्वदा ॥**
**दीर्घायुष्याय चान्येव सर्वसम्पत्समृद्धये ।**
**जन्मन्यशुभयोगानां विनाशाय विशेषतः[4] ॥**

**जातकर्मानुष्ठानप्रकारः** – वेदशाखामनुसृत्य आपस्तम्ब-आश्वलायन-बोधायनादि नानाशाखीयानाम् अनुष्ठानविधिः भिन्नो भवति। इदानीं वैखानसस्मार्तसूत्रोक्तदिशा वैखानसानां जातकर्मलक्षणं नृसिंहवाजपेयभाष्ये एवं निरूप्यते।

प्रथमम् अरिष्टगृहं सन्नद्धं करणीयम्। अरिष्टगृहं नाम सूतिकागृहमित्यर्थः। प्रथमम् अरिष्टागारं गोभिः आक्रान्तं करणीयम्। ततः गोमयेन संस्कृत्य अलङ्कृत्य तिलसर्षपधूपेन धूपयित्वा गर्भिणीं तत्र प्रवेशयेत्। प्रसवकरणे चतुराः तिस्रः चतस्रो वा स्त्रियः गर्भिणीं संवाहयेयुः। ततः गर्भिण्याः शरीरशैथिल्यादिचिह्नं ज्ञात्वा, गर्भसङ्घे योनेः विस्तारकारणं साधनं गृहीत्वा, योनिं प्रसवानुकूलां कुर्यात्।

ततः मरुवकादि ओषधिविशेषैः योनिं धूपयेत्। ततः सुवर्चलादि हलिनीं रुचकां वा योनेः विस्तारणाय उपयुज्य हिरण्यपुष्पी प्रभृतयः ओषधिविशेषाः भूतोच्चाटनार्थं रक्षाबन्धनरूपेण गर्भिणीहस्ते बन्धनीयाः। तदा शिशोः नासाग्रदर्शने ग्रहस्थितिः ज्ञेया।जायमाणेषौ मातुः शिरोभागे दक्षिणतः उदककुम्भं स्थापयेत्। ततः तूर्यादिमङ्गलवाद्यसाधनविशेषेण**मयैव सोमः पवते** ..... इति मन्त्रेण तस्याः उदरं स्पृशेदिति।एतावत्पर्यन्तं वैखानसस्मार्तसूत्रे त्रयोदशभिः सूत्रैः तत्क्रमः विस्तरेण व्याख्यातः। नृसिंहवाजपेयभाष्ये सूत्रार्थं विस्तरेण निरूपितवान्। सः स्मृतिविशेषः यथायथं अत्रोदाह्रियते।

**अथ जातकर्म व्याख्यास्यामः[5]।**

अथेति। अथानन्तरं जातकर्म जातसंस्कारं व्याख्यास्यामः।

अरिष्टागारं यथोक्तं कृत्वा वृषभोषितं तिलसर्षपैर्धूपयित्वा तां प्रवेशयेत् अरिष्टागारम् इति। अरिष्टागारं सूतिकागृहं, यथा ज्योतिश्शास्त्रेषूक्तं तथा कृत्वा कल्पयित्वा, वृषभैः गोभिरुषितं वासितं वृषभोषितं तिलाश्च सर्षपाश्च तैः धूपयित्वा तानग्नौ प्रक्षिप्य अरिष्टागारं सर्वतो धूपं कारयित्वा तां गर्भिणीं प्रवेशयेत्। प्रसवकाले तदन्तर्गमयेत्।

**तद्ज्ञाः स्त्रियस्तिस्रश्चतस्रो वा परिगृह्यैनां संवाहयेयुः।**

तदिति। तत्प्रसवविधिरौषधादीन् जानन्तीति तद्ज्ञाः स्त्रियस्तिस्रो वा चतस्रो वा परिगृह्य भृतकेन वृत्वा एनां गर्भिणीं संवाहयेयुः। अस्याः संवाहनं भरणं कारयेयुः।

---

2.पा-सू-3-4-71

3.पा-सू-7-3-79

4.जातकर्मविवरणम् (आन्ध्रभाषायाम्) - पुट-14, by P. Ramakrishnamacharyulu

5.श्रीवै-स्मा-सू- तृतीयप्रश्ने - चतुर्थखण्डे - 119-132 सूत्राणि - व्याख्या, पुट-124-125

**कुक्षौ शिथिले हृदयबन्धं मुक्त्वा सशूले जघने प्रजायत इत्यवधारयेत्।**

कुक्षेति। कुक्षावस्या उदरे शिथिले श्लथे सति हृदयं बध्यतेऽनेनेति हृदयबन्धं मुक्त्वा वस्त्रबन्धं विसृज्य शूलेन प्रसववेदनया सह वर्तत इति सशूले सति जघने नाभेरधः प्रदेशे प्रजायते प्रसूयत इत्यवधारयेत् विचारयेत्।

**गर्भसङ्गे विशल्यां सुवर्चलां वा योनौ निष्पीड्य निदध्यात्।**

गर्भेति। गर्भस्य सङ्गः लङ्घनं तस्मिन् सति विशल्यां हलिनीं वा सुवर्चलां रुचकां वा सद्यः क्षारं वाऽदायावघृष्य योनावस्या उपस्थे निष्पीड्य तं निदध्यात् तत्र निक्षिपेत्।

**धूपयेत्पिण्डीतकेनाहिकृत्त्या वा योनिम्।**

धूपयेदिति। पिण्डीतकेन या मरुवकेन वा सर्पकञ्चुकेन वा योनिं धूपयेत्।

**हिरण्यपुष्प्या मूलं हस्तपादयोरादधाति।**

हिरण्येति। हिरण्यपुष्प्याः पीतयूथिकायाः मूलमादाय हस्तौ च पादौ च तयोर्हस्तपादयोरादधाति। भूतरक्षणार्थं बद्ध्वा धारयन्ति।

**यदा नासाग्रं दृश्येत्तदाऽस्यग्रहस्थितिं ज्ञात्वा शुभाशुभं परीक्षेत।**

यदेति। यदा यस्मिन् काले जायमानस्य शिशोर्नासाग्रं घ्राणाग्रभागः दृश्येद् द्रष्टुं भवेत्। तदा तस्मिन् कालेऽस्य शिशोर्जन्मकालस्य ग्रहाणां सूर्यादीनां स्थितिं निलयं ज्योतिश्शास्त्रोक्तमार्गेण ज्ञात्वा विज्ञाय, शुभं चाशुभं च शुभाशुभं परीक्षेत समीक्षयेत्।

**यस्मात्तद्गुणान्वितं वर्धयेत्।**

यस्मादिति। यस्मात्कारणात् शुभगणैरन्वितं युक्तः तद्गुणान्वितं वर्धयेद् वृद्धिं प्रापयेत्। जायमाने मातुरुदकुम्भं दक्षिणतश्शिरोभागे स्थापयेत्। जायमाने शिशावुदकुम्भं वारिपूर्णं घटं दक्षिणतो मातुः जनन्याः शिरोभागे शिरः प्रदेशे स्थापयेत्।

**ततस्तूर्यन्तीं पादतो निधाय, यथैव सोमः पवते इत्युदरमभिमृशेत्।**

तदिति। पादतः पत्तः पादभागे तूर्यन्तीं वाद्यविशेषं निधायोदरमभिमृशेत्।

**कुमारे जाते द्वारवामेऽश्मनि परशुं तस्मिन्हिरण्यं स्थापयित्वा, अश्मा भव इत्यधरमुत्तरं करोति।**

कुमारेति। कुत्सितं मारयतीति कुमारः तस्मिन् जाते पुत्र उत्पन्ने सति, पुत्रोत्सवार्थं तूर्यं तमाघोष्य, तस्य पिता स्नात्वा, यथाशक्ति हिरण्यदानं कृत्वा, इमं कुमारं जातकेन कर्मणा संस्करिष्य इति सङ्कल्प्य, अरिष्टागारस्य द्वारस्य वामभागेऽश्मानं निधायास्मिन् श्मनि परशुं कुठारं निधाय तस्मिन् परशौ हिरण्यं सुवर्णं स्थापयित्वा अधरमधस्स्थितमुत्तरमूर्ध्वं करोति।

**तस्योपरि अङ्गादङ्गात् इति कुमारमेकया स्त्रिया धारयेत्।**

तस्येति। तस्याऽश्म उपर्युपरिभागे तमेकया स्त्रिया धारयेत्।

**तमद्भिरभ्युक्ष्य, तिलदेवपद्यस्व इति सतिलमक्षतं मूर्ध्न्याधायौपासनमरण्यां निर्हरति।**

तमिति। तं कुमारम् अद्भिरुदकुम्भाद्भिः भ्युक्ष्य सतिलं तिलसहितमक्षतम् इदं जात्येकवचनम् अक्षतान् मूर्धनि तस्य शिरसि आदाय निधाय औपासनमात्मन औपासनाग्निमरण्यां समिधि वा निर्हरति। समारोप्य पूर्ववदसगोत्रेणान्येन ब्रह्मचारिणा वा नित्यहोमं कारयति। न स्वयं जुहुयात्।।

**उपयुक्तग्रन्थानां सूची**

| Sl no | सङ्केताक्षरसूची | ग्रन्थनाम | चिरुनामा | ग्रन्थकर्ता | वर्षः |
|---|---|---|---|---|---|
| 01. | श्री-वै-गृ-सू | श्रीवैखानसगृह्यसूत्रम् (वाजपेयभाष्यम्) | तिरुमल तिरुपति देवस्थानम्, तिरुपति | श्रीमान् रोम्पिचर्ल पार्थसारथिभट्टाचार्यः | 1997. |
| | | | Svvutirupati | डा. यम्.सीतारामशास्त्रि | 2012 |
| 02. | श्री-वै-स्मा-सू | श्रीवैखानसस्मार्तसूत्रम् | श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति | श्रीमान् रोम्पिचर्ल पार्थसारथिभट्टाचार्यः | 2012. |
| 03. | गौ-ध-सू | गौतमधर्मसूत्राणि | चौखम्बा संस्कृत सिरीज् आफीस्, वारणासी | Umesh chndra panday | 1958. |
| 04. | अ.अ | अष्टाध्यायीसूत्रपाठः | बालमनोरमामुद्रणालयः, मद्रास् | शंकररामशास्त्रि | 1937 |